दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-3 ■ वर्ष-3 ■ अङ्क-266

1 19.07.2024 शुक्रवासरः वि.सं. २०८० आषाढ़शुक्लत्रयोदशी श्रावण 04 प्रविष्ठांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## गोण्डा-समीपे चण्डीगढ-डिब्रुगढ-एक्सप्रेस्-यानस्य १४ कोच-यानानि मार्गात् पतितानि, त्रयः जनाः मृताः, ३४ जनाः घातिताः





हिमसंस्कृतवार्ताः, गोंड़ा उत्तरप्रदेशः

उत्तरप्रदेशस्य गोण्डा-समीपे चण्डीगढ-डिब्रुगढ-एक्सप्रेस्-यानस्य १४ कोच-यानानि पटरीतः पतितानि, त्रयः जनाः मृताः, ३४ जनाः घातिताः च अभवन् । इतरथा गम्भीररूपेण घातितौ यात्रिकौ लखनऊनगरं निर्दिष्टौ। घटनायाः संज्ञानं गृहीत्वा मुख्यमन्त्री योगी आदित्यनाथः स्थानीयप्रशासनं प्रभावितयात्रिकाणां कृते यथाशक्तिः सहायतां कर्तुं निर्देशं दत्तवान्। सः अधिकारिभ्यः आह यत् ये आहताः सन्ति ते सम्यक् चिकित्सां प्राप्नुयुः इति सुनिश्चितं कुर्वन्तु। उत्तरसीमारेलवे (एनएफआर) इत्यस्य मुख्यजनसम्पर्क-पदाधिकारी सब्यसाची दे इत्यनेन उक्तं यत्, बुधवासरे रात्रौ ११.५९ वादने चण्डीगढतः डिब्रुगढं प्रति १५९०४ नम्बरं रेलयानं प्रस्थितम्। गुरुवासरे अपराह्णे २.२५ वादने गोण्डा-रेलस्थानकं प्राप्य अपराह्णे २.२८ वादने प्रस्थिता गोण्डा-मुख्यालयात् प्रायः १८ किलोमीटर् दूरे मोतिगञ्ज-झिलाही-बजारयोः मध्ये प्रातः २.४१ वादने रेलयानं पटरीतः पतित्वा विपरीतं परिक्रमितम् ।

एकैकशः १४ कोचयानानि पटरीतः पतितानि, येषु अष्टपरिक्रमिताः । रेलमन्त्रालयेन गोण्डारेलदुर्घटनायाः उच्चस्तरीयान्वेषणस्य आदेशः दत्तः। इदं अन्वेषणं रेलवे सुरक्षा आयुक्तस्य अन्वेषणात् पृथक् भविष्यति। मन्त्रालयेन प्रत्येकं मृतस्य निकटजनानाम् कृते १० लक्षरूप्यकाणां, गम्भीररूपेण आहतानाम् कृते २.५ लक्षरूप्यकाणां, मध्यमक्षतिग्रस्तानां कृते ५० सहस्ररूप्यकाणां च अनुग्रहस्य घोषणा कृता अस्ति।

## सुभाषितम्

**दुर्जनः स्वस्वभावेन**
**परकार्ये विनश्यति।**
**नोदरतृप्तिमायाति**
**मूषकः वस्त्रभक्षकः।।**

**भावार्थः**- दुष्ट व्यक्ति का स्वभाव ही दूसरे के कार्य बिगाड़ने का होता है। वस्त्रों को काटने वाला चूहा पेट भरने के लिए कपड़े नहीं काटता।

हिमसंस्कृतवार्ताः, डॉ.अमित शर्मा

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## वाहनस्य दर्पणाग्रे FASTag न धारयितानां वाहनानां कृते द्विगुणं शुल्कम्




भारतस्य राष्ट्रियराजमार्गप्राधिकरणं एनएचएआइ, वाहनस्य दर्पणाग्रे FASTag न धारयितानां वाहनानां कृते द्विगुणं शुल्कं ग्रहिष्यति। प्राधिकरणेन उक्तं यत् विण्डस्क्रीन् इत्यत्र FASTag इत्यस्य ज्ञात्वापि अनिर्धारणेन टोलप्लाजास्थानकेषु अनावश्यकविलम्बः भवति, येन राष्ट्रियराजमार्गप्रयोक्तृभ्यः असुविधा भवति। अस्मिन् विषये विस्तृता मानकसञ्चालनप्रक्रिया सर्वेभ्यः उपयोक्तृशुल्कसंग्रहणसंस्थाभ्यः अधिसूचिता अस्ति। देशे सर्वत्र प्रायः ४५ सहस्रकिलोमीटर् दीर्घाणां राष्ट्रियराजमार्गाणां द्रुतमार्गाणां च कृते प्रायः एकसहस्रं टोलप्लाजास्थानकेषु उपयोक्तृशुल्कं संगृह्यते ।

## नीट् पुनर्परीक्षा दृव्रतया भवेद् यत् अनेन सम्पूर्णपरीक्षायाः शुचिता प्रभाविता भविष्यति-सर्वोच्चन्यायालयः



**हिमसंस्कृतवार्ताः।** सर्वोच्च न्यायालयेन प्रोदीरितं यत् नीट् इत्यस्य पुनर्परीक्षा दृव्रतया भवेद् यत् अनेन सम्पूर्णपरीक्षायाः शुचिता प्रभाविता भविष्यति । मुख्यन्यायाधीशस्य डी० वाई चन्द्रचूडस्य नेतृत्वे सर्वोच्चन्यायालयपीठेन नीट-यूजी-चतुर्विंशत्यधिक-द्विसहस्रतमस्याः मेडिकल-प्रवेशपरीक्षायाः संचालने संभूतानां कथितानियमिततानां सन्दर्भ चत्त्वारिंशदधिक याचिकानां वादश्रवणं समाब्धम् । अन्वेषणसन्दर्भे पीठेन प्रख्यापितं यत् केन्द्रियान्वेषणा भिकरणस्य अन्वेषणं यथावस्थमेव प्रचलिष्यति। केन्द्रियान्वेषणा-भिकरणेन यदि अन्वेषणेन सम्बन्धितविषयाणां प्रोद्घाटनं यदि करिष्यते तदा सम्बद्धापराधिनः सावधानाः भविष्यन्ति । मुख्यन्यायाधीशः डी० वाई चन्द्रचूडः, न्यायाधीशः जे. डी. पारदीवाला एवं मनोज मिश्रा इत्येतेषां समेकितपीठेन विवादित-मेडिकल-प्रवेशपरीक्षया सम्बन्धित याचिकाः समालक्ष्य निर्णायकवादश्रवणं समारब्धम्। पीठेन मे-मासस्य पञ्चमदिनाङ्के परीक्षायां कथितानियमितताः समालक्ष्य कथितं यत् याचिकाकर्तृणः प्रमाणीकुर्वन्तु यत् प्रश्नपत्त प्रवचना प्रणालीगतरीत्या अभवत ।

## न्यायमूर्तिः नोंगमेइकापम-कोटिस्वरसिंहः न्यायमूर्ति आर. महादेवनश्च सर्वोच्च न्यायालयस्य न्यायाधीशत्वेन शपथग्रहणम् अकुरुताम्



न्यायमूर्तिः नोंगमेइकापम-कोटिस्वरसिंहः न्यायमूर्ति आर. महादेवनश्च सर्वोच्च न्यायालयस्य न्यायाधीशत्वेन शपथग्रहणम् अकुरुताम्। भारतस्य मुख्यन्यायाधीशेन न्यायमूर्तिना डी. वाई. चन्द्रचूड़ इत्यनेन शपथवचनं ग्राहितम्। इतः प्राक् न्यायमूर्तिः नॉगमेइकापम-कोटिस्वरसिंहः जम्मू-कश्मीर अब लद्दाख उच्च न्यायालयस्य न्यायधीशः आसीत्।

## मादकद्रव्याणां दुरुपयोगविरुद्धं युद्धं अतीव महत्त्वपूर्णं वर्तते-केन्द्रीय गृहमंत्री अमितशाहः



केन्द्रीय गृहमंत्री अमितशाहः राष्ट्रीय-नारकोटिक्ससहायता 'मानस' 1933 इत्यस्य शुभारम्भं कृतवान् । 'MANAS' (मादकद्रव्यगुप्तचरकेन्द्रं) सहायताप्रकोष्ठस्य माध्यमेन नागरिकाः मादकद्रव्यस्य तस्करीविषये सूचनां सार्वजनिकं कर्तुं शक्नुवन्ति तथा च नशानिवृत्तेः पुनर्वासस्य च परामर्शार्थम् २४ घण्टाः मादकद्रव्यनियन्त्रणब्यूरो इत्यनेन सह सम्बद्धाः भवितुम् अर्हन्ति। गतसायंकाले नवदिल्लीनगरे नार्को-समन्वयकेन्द्रस्य सप्तमस्य उच्चस्तरीयसमागमस्य अध्यक्षतां गृहमन्त्री कृतवान्।

केन्द्रीयगृहमन्त्री अमितशाहः अवदत् यत् मादकद्रव्याणां दुरुपयोगविरुद्धं युद्धं अतीव महत्त्वपूर्णं वर्तते, तत् गम्भीरतापूर्वकं प्राथमिकतारूपेण च ग्रहीतव्यम्। सः अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी इत्यस्य मादकद्रव्यरहितस्य भारतस्य संकल्पः तस्य महत्त्वपूर्णप्रतिबद्धतां दर्शयति। श्री शाहः अवदत् यत् एतत् एकं आह्वानम् अपि च अवसरः अपि अस्ति। गृहमन्त्री उक्तवान् यत् एतत् युद्धं एकतायाः दृढनिश्चयेन च विजयं प्राप्तुं शक्यते। केन्द्रराज्यसर्वकारस्य एजेन्सीभिः सह समन्वयेन देशे मादकद्रव्यस्य व्यापारं दुरुपयोगं च नियन्त्रयितुं अस्य सभायाः उद्देश्यम् अस्ति।

## तेलंगानायां कृषकाणां सस्य-ऋणमुक्तये षड्सहस्र-कोटितोऽप्यधिकानि रुप्यकाणि निस्सारितानि

तेलंगानायां राज्यसर्वकारेण कृषकाणां सस्यऋणमुक्तये षड्सहस्त्रकोटितो-ऽप्यधिकानि रुप्यकाणि निस्सारितानि। प्रथमचरणे एकादशलक्षाधिकाः जनाः लाभान्विताः भविष्यन्ति।

## नीट-यूजी प्रवेशपरीक्षाया प्रश्नपत्रप्रवञ्चनायां चत्वारः छात्राः निगडिताः

नीट-यूजी प्रवेशपरीक्षाया प्रश्नपत्रप्रवञ्चनायां केन्द्रीयान्वेषणा-भिकरणेन अखिल-भारतीय- आयुर्विज्ञान संस्थान - पटना इत्यस्य चत्वारः छात्राः निगडिताः। एम्स-पटनायाः कार्यकारी- निदेशकः डॉ. जी के पालः अवोचत् यत्र ये छात्राः निगडिताः ते एमबीबीएस पाठ्यक्रमस्य- द्वितीय-तृतीयवर्षयोः छात्रास्सन्ति। तेनोदीरितं यत् केन्द्रियान्वेषणाभिकरणेन निगडित-छात्राणां संगणकयन्त्राण्यपि स्वायत्तीकृतानि।

# केन्द्रीयमन्त्री जेपीनड्डा इत्यनेन सह मिलितवान् मुख्यमंत्री, प्रचुरौषधवाटिकायै अतिरिक्तवित्तीयसहायता याचिता



**हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः बुधवासरे सायं नवदेहल्यां केन्द्रीयस्वास्थ्यपरिवारकल्याणमन्त्री जे.पी. नड्डा इत्यनेन सह मिलितवान्। समागमे मुख्यमन्त्री राज्ये स्वास्थ्यक्षेत्रे आधारभूतसंरचनानां चिकित्सासुविधानां च उन्नयनार्थं राज्यसर्वकारस्य प्रतिबद्धतायाः विषये जे.पी.नड्डा इत्यस्मै सूचितवान्। मुख्यमन्त्री राज्यस्य चिकित्सालयेषु 'अत्याधुनिक' चिकित्साप्रौद्योगिक्याः आवश्यकतायाः उपरि बलं दत्तवान् येन राज्यस्य जनानां आधुनिकचिकित्सासुविधानां कृते राज्यात् बहिः गन्तुं न प्रयोजनम् भवेत्। सः निर्माणाधीनानां नाहन-चम्बा-हमीरपुर-चिकित्सा-महाविद्यालयानाम् कार्याणि सम्पन्नं कर्तुं धनस्य आग्रहं कृतवान्। सः अवदत् यत् राज्ये छात्राणां कृते गुणवत्तापूर्णं चिकित्साशिक्षा सुनिश्चिता भवति। राज्ये नर्सिंग् प्रशिक्षणं सम्पन्नं कृतवन्तः प्रशिक्षुणां समर्थनं अपि सः आग्रहं कृतवान् येन एतेषां प्रशिक्षुणां विदेशेषु अपि सेवाप्रदानस्य अवसराः प्राप्यन्ते। राज्यस्य अर्थव्यवस्थायां प्रचुरौषधवाटिकायाः (बल्क ड्रग पार्क) महत्त्वपूर्णां भूमिकां दृष्ट्वा स्थानीयजनानाम् कृते जीविकायाः आजीविकायाः च अवसरानां उपलब्धतां दृष्ट्वा मुख्यमंत्रिणा सुखविन्दरसिंहसुक्खुना केन्द्रीयस्वास्थ्यमन्त्रिणः अपि आग्रहः कृतः सः अस्य निर्माणाय अतिरिक्तवित्तीयसहायतां दद्यात्, येन तस्य शीघ्रं निर्माणं सुनिश्चितं भवति। केन्द्रीयमन्त्रिणा एतदर्थं केन्द्रात् सर्वसम्भवसहायतां सुनिश्चतं कर्तुं आश्वासनं दत्तवान्।

# केवलसिंहपठानिया उपमुख्य-सचेतकपदस्य कार्यभारं स्वीकृतवान्



**हिमसंस्कृतवार्ताः - शिमला।** शाहपुरविधानसभानिर्वाचनक्षेत्रस्य विधायकः केवलसिंहपठानिया गुरुवासरे उपमुख्यसचेतकपदस्य कार्यभारं स्वीकृतवान्। असौ प्रभारग्रहणं कृत्वा काङ्ग्रेसनेता राहुलगान्धी, प्रियंकागान्धी, मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः इत्येतान् प्रति च कृतज्ञतां प्रकटितवान्। अस्मिन् अवसरे कृषिपशुपालनमन्त्री चन्द्रकुमारः, आयुषयुवासेवा तथा क्रीडामन्त्री यादविन्द्रगोमा, नाहनविधायकः अजयसोलन्की तथा राज्यस्य विभिन्ध क्षेत्रेभ्यः आगताः दलकार्यकर्तारः समर्थकाः च वर्धापनं कृत्वा अभिनन्दनं कृतवन्तः।

## केवलसिंहपठानियावर्यस्य राजनैतिकं जीवनम्

ध्यातव्यं वर्तते यत् केवलसिंह पठानिया १९८७ तमात् वर्षात् एनएसयूआई तथा राज्यकाङ्ग्रेससमित्याम् विभिन्नानि पदस्थानानि स्वीकृत्य कार्यं कृतवान्। सः २००८ तमे वर्षे दाण्डी-यात्राम् अकरोत्। भारतसर्वकारस्य युवासेवाक्रीडामन्त्रालयेन २००९ तमे वर्षे सर्वोत्तमयुवापुरस्कारेण अपि पुरस्कृतः अस्ति। केवलसिंहपठानिया हिमाचलप्रदेशविश्वविद्यालयात् राजनीतिशास्त्रं विधिशास्त्रं च अधीतवान्। सः छात्रकालात् एव एनएसयूआइ-सङ्घटनेन सह सम्बद्धः आसीत्। १९८७ तः १९९१ पर्यन्तं केवलसिंहपठानिया धर्मशाला-नगरस्य राजकीय-स्नातकोत्तर-महाविद्यालयस्य परिसर-अध्यक्षः आसीत्। एतदतिरिक्तं तत्कालीनवीरभद्रसर्वकारे हिमुडा-संस्थायाः संचालकमण्डलस्य सदस्यः अपि आसीत्। सः काङ्ग्रेससर्वकारे अनेकानि महत्त्वपूर्णानि पदस्थानानि धारितवान्। केवल पठानिया २०१२ तः २०१७ पर्यन्तं हिमाचलप्रदेशपर्यटनविकासनिगमस्य सदस्यत्वेन अपि कार्यं कृतवान्। २०१२ तमे वर्षे हिमाचलमार्गपरिवहननिगमस्य उपाध्यक्षः अपि आसीत्। एतदतिरिक्तं पञ्जाब-चण्डीगढ-राजस्थान-महाराष्ट्र-मध्यप्रदेश-गोवा-प्रदेशेषु एनएसयूआइ-काङ्ग्रेस-पक्षयोः कृते अपि कार्यं कृतवान्। केवलसिंहपठानिया इत्यस्य अपि क्रीडाक्रियासु विशेषरुचिः अस्ति। सः राज्यस्य हॉकी-दलस्य नायकः अपि आसीत्, राष्ट्रियस्तरस्य पञ्चवारं राज्यस्य प्रतिनिधित्वं कृतवान्।

# निर्मण्डतः मातुः अम्बिकायाः तथा स्वामी-दत्तात्रेयस्य यष्टियात्रा श्रीखण्डं प्रस्थिता



**हिमसंस्कृतवार्ताः - कुल्लूः।** श्रीपंचदशनाम जूनाखाड़ा- निर्मण्डतः श्रीखण्डमहादेवस्य दर्शनाय 29तमा यष्टियात्रा गुरुवासरे आरब्धा। देशस्य सर्वतोभ्यः संतमुनिभिः सह स्थानीयजनैः सह शतभक्तानाम् एकः समूहः गुरुवासरे श्रीखण्डं प्रति प्रस्थितः। श्री पंचदशनाम जूना- अखाड़ा निरमण्डे समितिद्वारा ऋषि-मुनीनां भव्यं स्वागतं विहितम्। हवनयज्ञस्य पूजायाः च अनन्तरं निर्मण्डनगरं भगवतः महादेवस्य जयजयघोषैः प्रतिध्वनितम्। मातुः अम्बिकायाः, दत्तात्रेयस्वामिनः छडीयात्रया च सह श्रीखण्डमहादेवस्य दर्शनार्थं ऋषयः सन्ताः च प्रस्थिताः। मातुः अम्बिकायाः कार्यकर्ता (कारदारः) पुष्पेन्द्रशर्मा अवदत् यत् अस्मिन् समये दशनामीजूनाखाड़ा प्रमुखस्य दावतगिरीमहाराजस्य (फलाहारी बाबा) नेतृत्वे २९ तमायाः छड़ीयात्रायाः प्रस्थानम् अभवत्, यस्याः छडीयात्रायाः प्रमुखः टंकेश्वरशर्मा स्वस्य अधिकारिभिः सह उपस्थितः आसीत्। सः अवदत् यत् १७ जुलाई दिनाङ्के देवशयनी एकादशीदिने मन्दिरात् यष्टिं बहिः निष्कास्य जूनाखाड़ापरिसरम् आनीता। इतः १८ जुलाई दिनाङ्के सम्यक् पूजां कृत्वा श्रीखण्डमहादेवं प्रति प्रस्थिता। यात्रायाः प्रथमः विरामः ब्राह्मिनालायां भविष्यति। द्वितीये दिने थाचाडु, तृतीये दिने भीमद्वारी, जुलाई २१ दिनाङ्के गुरुपूर्णिमादिने प्रार्थना, दर्शनं च कृत्वा पुनः आगमिष्यति। पुनरागमने अत्र विशालः भोजः आयोजितः भविष्यति।

## देवढाङ्कगुहया सह भगवतः शिवस्य गहनसम्बन्धः अस्ति

रामपुर-निर्मण्डयोः मध्ये स्थितेन भगवतः शिवस्य अतीव प्राचीनगुहाया देवढाङ्केन सह शिवस्य अतीव प्राचीनः सम्बन्धः अस्ति। शिवः यदा भस्मासुरं वरं दत्तवान् तदा कथ्यते यत् यस्य उपरि हस्तं स्थापयति सः भस्म दग्धः भविष्यति। वरं प्राप्य भस्मासुरस्य मनसि दुर्विचारः आसीत् यत् वरस्य सत्यतां सिद्धयितुं प्रथमं शिवस्य उपरि किमर्थं न प्रयुज्यते इति। कथ्यते यत् तस्मिन् काले भगवान् शिवः अस्मिन् देवढाङ्कगुहायां निगूढः आसीत्, अद्यत्वे अपि बहुप्रत्ययम् अस्ति। अम्बिकामातुः कार्यकर्ता पुष्पेन्द्रशर्मा अकथयत् यत् श्रीखंडयात्रातः पूर्वं यः देवढांकगुहायाः मातुः अम्बिकायाः च दर्शनं करोति तस्य यात्रा सफला मन्यते।



# 'हिमाचले शगुन योजना न वारिता, प्रतिपक्षनेतुः जयरामठाकुरस्य आरोपः निराधारः'

**हिमसंस्कृतवार्ताः - शिमला।** स्वास्थ्य- सामाजिकन्याय-अधिकारितामन्त्री धनीरामशाण्डिलः अवदत् यत् राज्यसर्वकारः महिलाकल्याणार्थं गम्भीरतापूर्वकं कार्यं कुर्वन् अस्ति। तृणमूलस्तरस्य सकारात्मकपरिवर्तनानि भवन्ति। सः अवदत् यत् विपक्षस्य नेतुः जयरामठाकुरस्य भारतीयजनतापार्टीति दलं च राज्यस्य जनान् भ्रामयितुं प्रयतन्ते। सः अवदत् यत् अधुनैव जयरामठाकुरः कन्यानां विवाहार्थं राज्यसर्वकारेण चालितायाः शगुनयोजनायाः विषये टिप्पणीं कृतवान् अस्ति तथा च निराधारारोपं कृतवान् यत् अस्याः योजनायाः अन्तर्गतं वर्तमानराज्यसर्वकारः पुत्रीभ्यः विवाहाय शगुनरूपेण दीयमानस्य राशेः वारणं कृतवान् अस्ति।

## जयरामठाकुरस्य आरोपाः मिथ्या एव सन्ति

एते आरोपाः निराधाराः, साक्षात् असत्यं च इति मन्त्री धनीरामशाण्डिलः अवदत्। राज्यसर्वकारेण शगुनयोजनायाः अन्तर्गतं २०२३-२०२४ वित्तवर्षे १८.९५ कोटिरूप्यकाणां बजटप्रावधानं कृतम् आसीत्, यस्मात् १४.४५ कोटिरूप्यकाणां राशिः व्ययिता अस्ति राज्यस्य ४६६२ कन्याः अस्याः राशेः लाभं प्राप्तवत्यः। अस्याः योजनायाः अन्तर्गतं कन्याभ्यः विवाहे सर्वकाराद् शुभदानरूपेण ३१,००० रूप्यकाणि दत्तानि भवन्ति। अस्मिन् वित्तवर्षे शगुनयोजनायाः अन्तर्गतं ३०.४० कोटिरूप्यकाणां बजटप्रावधानं कृतम् अस्ति, यत् गतवर्षस्य अपेक्षया १२ कोटिरूप्यकाणां अधिकम् अस्ति।

## 'प्रत्येकं योग्यमहिलायै प्रतिमासं १५०० रूप्यकाणि'

मन्त्री धनीरामशाण्डिलः अवदत् यत् राज्यस्य प्रत्येकं पात्रमहिलायाः कृते प्रतिमासं १५०० रुप्यकाणि अर्थात् प्रतिवर्षं १८,००० रुप्यकाणि प्रदातुं उद्देश्यं कृत्वा इन्दिरागान्धी- प्रियभगिनी-महिला सुख-सम्माननिधियोजना आरब्धा अस्ति। राज्यस्य प्रायः २,८५,००० महिलाः अस्याः योजनायाः लाभं प्राप्तुम् आरब्धाः सन्ति। राज्यसर्वकारः सामाजिकसुरक्षावृत्तेः अन्तर्गतं प्रतिवर्षं प्रायः ८,२४,००० वृद्धानां, विधवानां, एकलमहिलानां च कृते प्रायः १३३० कोटिरूप्यकाणि व्यययति।

## संस्कृतविद्यास्थानानि-३
## वेदस्य अन्यानि नामधेयानि




**अ) आम्नायः** -- आ उपसर्गपूर्वकात् भ्वादिगणीयात् म्ना अभ्यासे एतस्माद्धातोः निष्पन्नोयं शब्दः। सम्यक् म्नायते अभ्यस्यते इति आम्नायः। अभ्यासस्य सम्यक्त्वं नाम गुरुमुखात् श्रवणं नियमपूर्वकपठनं च।

**आ) त्रयी** – शतपथब्राह्मणे उक्तम्– त्रयी वै विद्या ऋचो यजूंषि सामानि। विद्याशब्देन अत्र वेदाः गृह्यन्ते। एतेषु अथर्ववेदस्य समावेशः अत्र न कृतः इति भाति। तथापि वेदमन्त्राः त्रिविधाः एव सन्ति। ऋच्यते स्तूयते देवता अनया सा ऋक्। ऋग्भिः देवतानां स्तुतिः क्रियते। अनियताक्षरावसानो यजुः। ,गद्यात्मको यजुः। यजुः गद्यमन्त्रः भवति तथा च काव्ये इव तस्मिन् अक्षरसंख्या नियता न विद्यते। गीयमानमन्त्रः साम। एतेषां त्रिविधमन्त्राणां व्याख्या पूर्वमीमांसायाम् एवमस्ति–
तेषामृग्यत्रार्थवशेन पादव्यवस्था।गीतिषु सामाख्या। शेषे यजुःशब्दः।
एते त्रिप्रकारकाः मन्त्राः चतुर्षु वेदेषु अन्तर्भूताः अतः एतदनुसारं वेदानां त्रयी इति अभिधानम्। षड्गुरुशिष्येणापि तथैवोक्तम्–
**विनियोक्तव्यरूपश्च त्रिविधः सम्प्रचक्षते।**
**ऋग्यजुःसामरूपेण मन्त्रः वेदचतुष्टये।।**
अपरं स्पष्टीकरणं नाम ज्ञानकर्मोपासनाः एते त्रयः विषयाः चतुर्षु वेदेषु वर्णिताः अतः वेदानां त्रयी इत्यभिधानम् इत्यपि एका ऊहा।

**इ) निगमाः**-- निगम्यते ज्ञायते अनेनेति निगमः। वेदेन चतुर्विधपुरुषाणां प्राप्त्यर्थम् आवश्यकसाधनानि, कर्माणि च ज्ञायन्ते।

**ई) आगमाः**-- आगच्छन्ति बुद्धिमारोहन्ति अभ्युदयनिःश्रेयसोपायाः यस्मात् सः आगमः इति वाचस्पतिमिश्रः।

**उ) स्वाध्यायः**--सुष्ठु आवृत्य अध्यायः स्वाध्यायः अभ्यसनम्। स्वाध्यायोध्येतव्यः, स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् इत्यादीनि वेदवाक्यानि। उक्तं च गीतायाम् स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।

**ऊ) छन्दः**-- छन्दःशब्दः छदि संवरणे इत्यस्माद्धातोः इति सायणः। छन्दांसि छादनात्। छादनम् आवरणम् निबन्धनं रक्षणं वा। वेदमन्त्राः गायत्र्यादिभिः छन्दोभिः आवृताः निबद्धा वा सन्तीत्यतः वेदस्य कृते छन्दःशब्दस्य प्रयोगः क्रियते। छन्दःशब्दस्य प्रयोगः प्रामुख्येन मन्त्रविषयकः एव न तु ब्राह्मणविषयकः।
छान्दोग्यब्राह्मणे उक्तम्– देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशंस्ते छन्दोभिश्छादयन् यदेभिश्छादयंस्तच्छन्दसां छन्दत्वम्। देवाः मृत्योः अबिभयुः। अतः स्वसंरक्षणाय ते वेदान् प्रविश्य आत्मानं छन्दोभिः नाम वेदमन्त्रैः आवृण्वन् । एतदेव छन्दसां छन्दत्वम् आच्छादकत्वम्।

**ए) ब्रह्म** –बृंहति वर्धते निरतिशयमहत्त्ववान् भवति। अभ्युदयनिःश्रेयसार्थं वेदानां महत्त्वं निरतिशयम्।

**ऐ) श्रुतिः** -- गुरुपरम्परया श्रवणेन शिष्यैः वेदज्ञानं प्राप्यन्ते अतः वेदानां श्रुतिः इति संज्ञा। मनुः वदति–
श्रुतिस्तु वेदो विज्ञेयो।

श्री.अभिजित् तोडकर
abhitdkr9@gmail.com

# ।। श्रीरामायणकथा ।।

## उत्तरकाण्डम्।
## (त्रिंशः सर्गः) रावणस्य श्वेतद्वीपगमनकथनम्।
## (द्वितीयः खण्डः)



हिमसंस्कृतवार्ता, प्रदीपः
pradipnath997@gmail.com

दुरात्मनः रावणस्य तद् वचनं श्रुत्वा युवतीजनाः सर्वे स्मयन्ते स्म। तासाम् एका क्रुद्धा युवती तं दशाननं बालवद् गृहीत्वा सखीजनानां मध्ये भ्रामयित्वा ताः समाहूय अवदत् पश्यत! एतं धृतं विंशतिभुजं दशाननं भ्रामयामि। ततः सः रावणः हस्तात् हस्तं क्षिप्रं भ्राम्यते स्म। तेन भ्राम्यमाणेन बलिना राक्षसेन रोषेण सा युवती सन्दष्टा अभवत्। ततः हस्तवेदनात् तया युवत्या सः कीटः मुक्तः अभवत् किन्तु अन्या युवती तं राक्षसेन्द्रं गृहीत्वा आकाशम् उदपतत्। तदानीं तामपि युवतीं सङ्क्रुद्धः सः रावणः नखैः व्यदारयत्। भीतः रावणः यदा तां युवतीं नखैः व्यदारयत् तदा सा वेदनां प्राप्य तं राक्षसं समुद्रजले अक्षिपत्। वज्रविदारितं पर्वतस्य शिखरं यथा तया युवत्या क्षिप्तः सः दशग्रीवः सागरजले अपतत्।

एवं सः रावणः श्वेतद्वीपनिवासिभिः युवतीभिः प्रगृह्य भ्रामितः अभवत्। महातेजाः नारदः रावणम् इत्थं धर्षितं प्राप्य सुचिरं विस्मयं गत्वा भृशम् अहसत् अनृत्यत् च। हे महाबाहो राम! एतदर्थं दुरात्मना रावणेन विज्ञाय त्वत्तः मरणकाङ्क्षया सीता अपहृता। अतः हे राम! त्वं हि शङ्खचक्रगदाधरः देवः नारायणः। त्वं हि सर्वदेवाभिपूजितः पद्मनाभः भक्तानामभयप्रदः महायोगी। रावणस्य वधार्थं त्वं मानुषीं तनुं प्रविष्टः असि। हे राम! किमर्थं त्वम् आत्मानं न वेत्सि यथा अहमेव नारायणः अस्मि इति? हे महाभाग! आत्मना आत्मानं स्मर। त्वं गुह्यादपि गुह्यतरः इति ब्रह्मदेवः अब्रवीत्। त्वं हि त्रिगुणः त्रिवेदी त्रिधामा त्रिकालकर्म त्रिदशारिमर्दनः। त्वं हि अदित्या गर्भसम्भूतः सनातनः विष्णुः। लोकान् अनुग्रहीतुं त्वं मानुषीं तनुं प्रविष्टः असि। हे सुराणां सुरसत्तम! त्वया तत् कार्यं साधितम्।

सः पापः सपुत्रबलबान्धवः रावणः निहतः अभवत्। सुराः ऋषयः तपोधनाः सर्वे प्रहृष्टाः अभवन्। त्वत्प्रसादात् जगत् सर्वं प्रशान्तम् अभवत्। महाभागा लक्ष्मीः त्वदर्थं जनकस्य गृहे वसुधातलात् सम्भूता। सा सीता रावणेन लङ्काम् आनीय माता इव परिरक्षिता। इत्येवं महर्षिणा अगस्त्येन प्रोक्तां दिव्यां कथां श्रुत्वा भ्रातृभिः सह राघवः परमं विस्मयं गतः। ततः ससुग्रीवाः वानराः, सविभीषणाः राक्षसाः, सहामात्याः राजानः, अन्ये च समागताः धर्मसमन्विताः ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राः सर्वे अत्यन्तं हृष्टाः अभवन्। ततः महर्षिः अगस्त्यः रामम् अब्रवीत् हे राम! इदानीं वयं यास्यामः। एवमुक्त्वा पूजिताः ते सर्वे यथागतम् अगच्छन्। ततः परं भास्करे अस्तं गते नृपवरान् विसृज्य सन्ध्याम् उपास्य नरवरोत्तमः श्रीरामः प्रवृत्तायां रजन्याम् अन्तःपुरं प्राविशत्।

# डॉ. एम. सी. सेठिया मेमोरियल अन्तर्विद्यालयप्रतियोगितानाम् आरम्भः, वर्धमान श्रीकल्याण इंटरनेशनल विद्यालये आयोजनम्

हिमसंस्कृतवार्ताः, देवेश उपाध्याय, जयपुरम्



वर्धमान श्रीकल्याण इंटरनेशनल विद्यालयपरिसरे २०२४ तमस्य वर्षस्य जुलाई-मासस्य १८ दिनाङ्के उत्साहेन गुञ्जितवान् यतः डॉ. एम. सी. सेठिया- स्मारक- अन्तर्विद्यालय- प्रतियोगितानाम् आरम्भः अभवत्, यत्र क्रीडा- तकनीकी- सांस्कृतिकक्षेत्रेषु त्रिदिनानां तीव्र- जीवन्त- क्रियाकलापानां प्रतिज्ञा अभवत् भव्य उद्घाटने मुख्य अतिथि राजस्थान रग्बी फुटबॉल संघस्य अध्यक्षः पंडित सुरेशमिश्रा उपस्थितः आसीत्। पण्डितमिश्रा स्वस्य प्रेरणादायके सम्बोधने विविधकार्यक्रमेषु सहभागिताद्वारा समग्रविकासस्य महत्त्वे बलं दत्तवान्। विशिष्टातिथिः वर्धमानसमूहस्य अध्यक्षः डॉ. कमल सेठिया इत्यनेन एताः भावनाः प्रतिध्वनिताः, शिक्षायाः पाठ्येतरस्य उत्कृष्टतायाः च प्रवर्धनार्थं डॉ. एम. सी. सेठिया इत्यस्य विरासतं रेखांकितम्। विशेषातिथिः जयपुरस्य वर्धमानसमूहस्य विद्यालयस्य निदेशिका नम्रता सेठिया प्रधानाध्यापिका आराधना पारीक, उपप्रधानाध्यापिका रेणुका जोशी इत्येताभ्यां सह स्वस्य सम्माननीयेन उपस्थित्या अस्य अवसरस्य शोभां कृतवती, येन आयोजनम् अधिकप्रतिष्ठां दत्तवती। उद्घाटनस्य अनन्तरं क्रीडा, प्रौद्योगिकी, सांस्कृतिकक्रियाकलापाः च व्याप्ताः समानान्तरकार्यक्रमाः अभवन्। नव- आयोजनेषु युवानां प्रतिभागिनां प्रतिभाः प्रदर्शिताः, यत्र गायनम्, चित्रकला, एक्स्टेम्पोर् स्पर्धाः च सन्ति प्रौद्योगिकीखण्डे नवोदितानां प्रौद्योगिकीविदां अभिनवपरियोजनानां प्रस्तुतीनां च प्रकाशनं कृतम्। क्रीडावर्गे बालकबालिकानां कृते ऊर्जावानाः १४ वर्षाणाम् अधः १७ वर्षाणां बास्केटबॉलप्रतियोगिताः अभवन्, यत्र अनेकानाम् विद्यालयानाम् उत्साहेन सहभागिता अभवत् जेपीएचएस, डीएवी, सुबोध पब्लिक, एमपीएस, वीआईएस, एनबीएफ इत्येतयोः दलयोः प्रशंसनीयक्रीडा कौशलं च प्रदर्शितम्, भयंकरप्रतिस्पर्धासु च स्पर्धासु च शीर्षस्थानानां कृते स्पर्धा अभवत्।

आदरणीयाः निर्णायकमण्डलस्य सदस्याः, स्वस्वक्षेत्रविशेषज्ञाः, प्रतिभागिनां मूल्याङ्कनं कृतवन्तः, येन सर्वेषां कृते निष्पक्षः समृद्धः च अनुभवः सुनिश्चितः अभवत्। आयोजनेन न केवलं स्वस्थप्रतियोगितायाः भावनां पोषितवती अपि तु सम्पूर्णे जयपुरस्य छात्राणां विविधप्रतिभानां परिश्रमस्य च उत्सवः कृतः। यथा डॉ. एम सी सेथिया स्मृतिः अन्तर्विद्यालयप्रतियोगिता आगामिदिनद्वये निरन्तरं प्रचलति, तथैव एषा स्वस्य नामधेयस्य दृष्ट्या सत्यं शिक्षणस्य, सृजनशीलतायाः, एथलेटिकपराक्रमस्य च उत्सवः भविष्यति इति प्रतिज्ञायते। दिवसस्य आयोजनानां विजेतानां उत्सवं कृत्वा पुरस्कारवितरणसमारोहेण दिवसस्य पराकाष्ठा अभवत्। प्रतिभागिनां हर्षमुखाः प्रेक्षकाणां तालीवादनं च रोमाञ्चकारीदिवसस्य उपयुक्तं समाप्तिम् अकरोत्। वर्धमान श्रीकल्याण इंटरनेशनल विद्यालयः इत्यत्र जीवन्तं वातावरणं, प्रतिभागिनां समर्पणं, विशिष्टातिथिनां समर्थनं च मिलित्वा, एकस्य अविस्मरणीयस्य आयोजनस्य मञ्चं स्थापयति यत् सर्वेषु संलग्नानाम् उपरि स्थायिप्रभावं त्यक्ष्यति। अस्मिन् अवसरे परिसरे अनेकाः अध्यापकगणः विद्यार्थिनः च उपस्थिताः आसन्।

## गाजापट्टी इत्यस्मिन् स्थाने तत्कालतया पूर्णरूपेण च संघर्षविरामः भवेदिति –
## संयुक्तराष्ट्र-सुरक्षापरिषदि भारतस्य उपप्रतिनिधि




संयुक्तराष्ट्रे भारतेन गाजापट्टी इत्यस्मिन् स्थाने तत्कालतया पूर्णरूपेण च संघर्षविरामः भवेदिति स्वकीया अभ्यर्थना पुनरुच्चारिताऽस्ति। भारतेन विनैव न्यासेन बन्धकानां मोचनस्यापि आवाहनं कृतमस्ति। बुधवासरे पश्चिम एशिया विषये सम्बन्धिते एकस्मिन् मुक्तसंवादे संयुक्तराष्ट्र-सुरक्षापरिषदि भारतस्य उपप्रतिनिधिना आर. रविन्द्रेन उक्तं यत् नैकानि वर्षाणि यावत् नैकैः प्रकारैश्च फलिस्तीनदेशाय प्रदत्तः विकाससहायता सम्बन्धी धनराशिः विंशत्यधिकैकशतमिलियन अमरिकी डॉलर-परिमितोऽस्ति। वाशिंगटनस्य दूतेन लिंडा-थॉमस-ग्रीनफील्ड इत्यनया संयुक्तराष्ट्रसुरक्षापरिषदि उक्तं यत् अपेक्षायाः प्रायशः चतुर्मासानन्तरं गजायां शान्तिमार्गे प्रगतिः अवलोक्यते इति।